# संस्कृत वार्ता:

दिनाङ्क :- 19.04.2026 प्रात: - 06:55

**प्रधानमन्त्री-सम्बोधनम्:**

प्रधानमन्त्री नरेन्द्रमोदी अद्य आश्वासितवान् यत् तस्य प्रशासनं महिला-आरक्षणस्य पथि आगच्छन्तं प्रत्येकं बाधाम् उन्मूलयिष्यति। ह्यः रात्रौ राष्ट्रं सम्बोधयन् प्रधानमन्त्री न्यगदयत् यत्, यानि दलानि महिला-आरक्षणस्य विरोधं कुर्वन्ति, तानि संसदि राज्य-विधानसभासु च महिलानां सहभागितां नैव अपाकर्तुमर्हन्ति। । सः अवदत् यत्, महिलानां सशक्तिकरणदिशि भारतीय-जनता-दलस्य राष्ट्रिय-जनतान्त्रिक-गठबन्धनस्य च संकल्पः अक्षुण्णम् अस्ति। सः दुःखं प्रकटितवान् यत्, यदा महिलानां कृते एषः विधेयकः पराजितो जातः तदा काङ्ग्रेस-डी एम के-सपा-तृणमूल-सदृशानि दलानि हर्षं प्रकटितवन्तः, एतत् अत्यन्तं हृदयविदारकम् अस्ति।

-----------------------------------------

**शिवराज-उत्पादन-क्रयणम्:**

प्रशासनेन उत्तरप्रदेशे आलुकस्य , आन्ध्रप्रदेशे चणकस्य क्रयण-प्रक्रियायै अनुमतिः दत्ता। अपि च, कर्णाटकराज्ये द्विदलस्य क्रयण-समयसीमा वर्धिता अस्ति। केन्द्रीय-कृषि-एवं-कृषक-कल्याण-मन्त्री शिवराजसिंहचौहानेन अङ्गीकृतं यत् इयं क्रयण-प्रक्रिया सुनिश्चितं करोति यत् कृषकाः तेषां कठोरपरिश्रमेण उत्पादितानां सस्यानां कृते उचितं लाभप्रदं -मूल्यं च प्राप्नुयुः।

-----------------------------------------

**गङ्गोत्री-यमुनोत्री-उद्घाटनम्:**

उत्तराखण्ड-राज्ये अद्य उत्तरकाशी-मण्डले गङ्गोत्री-यमुनोत्री-मन्दिरयोः द्वार-उद्घाटनेन सह 'चतुर्धाम-यात्रा' विधिवत् आरभ्यते। मुख्यमन्त्री पुष्करसिंहधामी ह्यः ऋषिकेशतः यात्रायाः कृते बस-यानानां हरित-संकेतेन प्रस्थानं कारितवान्। अस्मिन् अवसरे सः अवदत् यत् सुगमा,

सुरक्षिता, सुव्यवस्थिता च तीर्थयात्रा सर्वकारस्य प्रथमा प्राथमिकता अस्ति। मुख्यमन्त्री सर्वान् भक्तान् अपि न्यवेदयत् यत् ते धार्मिकस्थलेषु यात्रा-मार्गेषु च स्वच्छतां निर्वहन्तु।

-------------------------------------------

## तमिळनाडु-निर्वाचनप्रचारः

तमिळनाडु-राज्ये एप्रिल-मासस्य एकविंशतिः दिनाङ्के निर्वाचनप्रचारस्य समाप्तेः पूर्वं राजनैतिक-वाक्प्रहारः शाब्दिक-द्वन्द्वः च चरमोत्कर्षं प्राप्तवन्तः। सर्वेषां दलानां शीर्षनेतारः अन्तिमप्रचाराय राज्यस्य भ्रमणं कुर्वन्तः सन्ति। अद्य केन्द्रीय-गृहसचिवः भाजपेतिदलस्य-नेता च अमित शाहः एन-डी-ए गठबन्धनस्य समर्थनार्थं ईरोड-मण्डलस्य शिवगिरि-क्षेत्रे प्रचारं करिष्यति। ततः प्राक् प्रधानमन्त्री नरेन्द्रमोदी अपि गठबन्धनस्य विजय-सम्भावनाः वर्धयितुं राज्ये प्रवासं विहितवान्।
विपक्षीयदलानां पक्षतः काङ्ग्रेस-नेता राहुल गान्धी उत्तर-मण्डलेषु प्रचारं कृतवान्। राष्ट्रिय-जनता-दलस्य नेता तेजस्वी यादवः अपि प्रचार-यात्रायां सम्मलितः भूत्वा कोयम्बत्तूर-तिरुपुर-नीलगिरि-क्षेत्रेषु 'धर्मनिरपेक्ष-प्रगतिशील-गठबन्धनस्य' पक्षे प्रचारं कृतवान्। इतः पूर्वं कणिमोझी महोदया वृद्धचल-क्षेत्रे प्रेमलता-विजयाकान्तस्य पक्षे प्रचारं कृतवती।

-------------------------------------------

## संस्कृत - साप्ताहिकी

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक-वादनतः भविष्यति, भवन्तः सर्वे श्रोतुं प्रभवन्ति।

-------------------------------------------

## आई.पी.एल्.

क्रिकेट्-क्रीडायां हैदराबाद-नगरस्य राजीवगान्धी-अन्ताराष्ट्रिय-क्रीडाङ्गणे 'सनराइजर्स हैदराबाद' दलेन 'चेन्नै सुपर किंग्स' दलं दश धावनाङ्कैः पराजितम्। मलिङ्गा क्रीडायाः

नायकत्वेन सम्मानितः।

अद्य कोलकाता-नगरस्य ईडन् गार्डन्-क्रीडाङ्गणे अपराह्ने सार्ध-त्रिवादने 'कोलकाता नाइट राइडर्स' दलस्य 'राजस्थान रॉयल्स' दलेन सह स्पर्धा भविष्यति। अपरपक्षे, रात्रौ सार्ध-सप्तवादने चण्डीगढ-नगरे 'पञ्जाब किंग्स' दलं 'लखनऊ सुपर जायन्ट्स' दलेन सह स्पर्धिषीष्ट ।

।। इति वार्ता:।।